# Shri Vyasa Stuti 2 or Shri Vasishtha Krishna Ashtakam

# શ્રીવ્યાસસ્તુતિઃ ૨ અથવા શ્રીવાસિષ્ઠકૃષ્ણાષ્ટકમ્

## Document Information

Text title : Shri Vyasa Stuti 2 or Shri Vasishtha Krishna Ashtakam

File name : vyAsastutiH2.itx

Category : deities_misc, gurudev, vAdirAja, aShTaka

Location : doc_deities_misc

Author : Vadiraja

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 29, 2021

*sanskritdocuments.org*

# Shri Vyasa Stuti 2 or Shri Vasishtha Krishna Ashtakam

# શ્રીવ્યાસસ્તુતિઃ ૨ અથવા શ્રીવાસિષ્ઠકૃષ્ણાષ્ટકમ્

શ્રીશં વિચિત્રકવિતારસપૂરિતાશં
    શ્રીશઙ્કરોરગ ખગેન્દ્ર હૃદબ્જવાસમ્ ।
આશઙ્કમાન જનતૃપ્તિકરોઽતિહાસં
    વ્યાસં નતોઽસ્મિ હરિતોપલસન્નિકાશમ્ ॥ ૧॥

વેદાન્તસૂત્ર પવનોદ્ધૃત પઞ્ચવેદા
    મોદાંશતોષિત સુરર્ષિનરાદિભેદામ્ ।
બોધામ્બુજાત લસિતાં સરસીમગાધાં
    શ્રીદાં શિતોઽસ્મિ શુકતાતપદામખેદામ્ ॥ ૨॥

દ્વૈપાયનો જયતિ યન્નિજશક્તિદીપઃ
    પાપાભિવર્ધિત કુવાદિતમિસ્રતાપઃ ।
પાપાખ્યદુર્ભગદશાકૃતિ તીવ્રકોપઃ
    પાપાદ્ભુતૌષધિરગે શ્વસનાંશરૂપઃ ॥ ૩॥

ઇન્દ્રાદિદૈવત હૃદાખ્ય ચકોરચન્દ્રા
    મન્દાશુ કલ્પશુભ જલ્પિત પુષ્પવૃન્દઃ ।
વૃન્દારકાઙ્ઘ્ર્યુપલતા ગુણરત્નસાન્દ્રો
    મન્દાય મે ફલતુ કૃષ્ણતરુઃ ફલં દ્રાક્ ॥ ૪॥

માતાહિતેવ પરિરક્ષતિયેન ગીતા
    ગીતાગ્ર્ય ભારત પુરાણકૃતાવિગીતા ।
વાતાંશ મધ્વવરદઃ સગિરો મમૈતાઃ
    ખ્યાતા પરાશરસુતો વિદધાતુ ધાતા ॥ ૫॥

પારં ભવાખ્યજલધેર્ભુવનૈકસારં
    સ્વૈરં કૃતોરુવિધ વેદ પથ પ્રચારમ્ ।
આરઞ્જિતામરજનં સુખચિચ્ચરીરં
    ધીર સ્મરામિ હૃદિ સત્યવતીકુમારમ્ ॥ ૬॥

ભાવાશ્રિતં યમનુસૃત્ય ભજન્તિ દેવાઃ
    સેવારતાશ્ચ મુનયઃ કવયોનૃદેવાઃ ।
યો વાસુદેવ વપુરસ્ય મહાનુભાવાં
    શ્ચ્રિબાદરાયણ હરેર્ન ગૃણીત કોવા ॥ ૭॥

જ્ઞાનં પ્રદેહિ ભવદાગમવાર્ધ્યધીનં
    શ્રીનન્દસૂનુ પદભક્તિ નદીનિદાનમ્ ।
આનન્દતીર્થવરદોચ્ચ મહાધ્વનીનં
    દીનં બદર્યધિપતે કુરુ મામમાનમ્ ॥ ૮॥

વાસિષ્ઠવંશતિલકસ્ય હરેર્મનોજ્ઞં
    દોષૌઘખણ્ડનવિશારદમષ્ટકં યે ।
દાસાઃ પઠન્ત્યનુદિનં ભુવિ વાદિરાજ
    ધીસમ્ભવં પરિભવો ન દિશાશુ તેષામ્ ॥ ૯॥

ઇતિ શ્રીવાદિરાજયતિવિરચિતા વ્યાસસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by Krishnananda Achar

---

*Shri Vyasa Stuti 2 or Shri Vasishtha Krishna Ashtakam*

pdf was typeset on August 29, 2021

Please send corrections to *sanskrit@cheerful.com*